क्ष्यया तमुद्देशमागता सखीभिर्वृता। तां दृष्ट्वा रूपसम्पन्नां क्रीड़न्तीं वरुणालये। तदाऽऽविशत्परो हर्षो वरुणं चोर्वशीकृते। स तां पद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम्। वरुणोवरयामास मैथुनायाप्सरोवराम्। प्रत्युवाच ततः सा तु वरुणं प्राञ्जलिः स्थिता। मित्रेणाहं वृता साक्षात्पूर्वमेव सुरेश्वर!। वरुणस्त्वब्रवीद्वाक्यं कन्दर्पशरपीड़ितः। इदं तेजः समुत्स्रक्ष्ये कुम्भेऽस्मिन्देवनिर्मिते। एवमुत्सृज्य सुश्रोणि! त्वय्यहं वरवर्णिनि!। कृतकामो भविष्यामि यदि नेच्छसि संगमम्। तस्य तल्लोकनाथस्य वरुणस्य सुभाषितम्। उर्वशी परमप्रीता श्रुत्वा वाक्यमुवाच ह। काममेतद्भवत्वेवं हृदयं मे त्वयि स्थितम्। भावश्चाप्यधिकं तुभ्यं देहो मित्रस्य तु प्रभो!। उर्वश्या एवमुक्तस्तु रेतस्तन्महदद्भुतम्। ज्वलदग्निसमप्रख्यं तस्मिन् कुम्भे न्यवासृजत्। उर्वशी त्वगमत् तत्र मित्रोवै यत्र देवता। तान्तु मित्रः सुसंक्रुद्ध उर्वशीमिदमब्रवीत्। मयाऽभिमन्त्रिता पूर्वं कस्मात्त्वमवसर्जिता। पतिमन्यं वृतवती किमर्थं दुष्टचारिणि!। अनेन दुष्कृतेन त्वं मत्क्रोधकलुषीकृता। मनुष्यलोकमास्थाय कञ्चित्कालं निवत्स्यसि” इति तस्य तस्यां शापमुक्त्वा “यः स कुम्भो रघुश्रेष्ठ! तेजःपूर्णो महात्मनोः। तस्मिंस्तेजोमयौ विप्रौ सम्भूतावृषिसत्तमौ। पूर्वं समभवत्तत्र अगस्त्योभगवानृषिः। नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत्। तद्धि तेजस्तु मित्रस्य उर्वश्याः पूर्वमाहितम्। तस्मिन् समभवत्कुम्भे तत्तेजोयत्र वारुणम्। कस्यचित्त्वथ कालस्य मित्रावरुणसंभवः। वशिष्ठस्तेजसा युक्तो जज्ञे इक्ष्वाकुदैवतम्”।

अत्रैवमाख्यायिका प्रथमसुर्वशीं मित्रो दृष्ट्वा तामामन्त्रितवान् तयाच त्वन्निवासमागमिष्यामीत्युक्तस्तदा वरुणलोकस्य एव मित्रस्तद्दर्शनाद्वटस्खलितं निजतेजः कुम्भे उत्सृज्य स्वन्निवासं जगाम पश्चाद्वरुणोऽपि तां दृष्ट्वा स्खलितं तेजः कुम्भे व्यसृजत् ततोमित्रनिवासंगता मित्रेण शप्ता चेति। रामा० श्लोकस्यायमर्थः नाहं सुतस्तवेति यद्यपि मित्रेणापि कुम्भे रेत उत्सृष्टं तथापि तवैकस्य पुत्रो न भवामीत्युक्त्वाऽपाक्रामत्। एवमुक्तौ बीजमाह तद्धि तेजइति अगस्त्योत्पत्तिहेतुभूतं मित्रस्य तेजः पूर्वमुर्वशीनिमित्तवरुणवीर्यविसर्गात्पूर्वमाहितं यस्मिन् कुम्भे तस्मिन्नेव कुम्भे वारुणं तेजः समभवत् संगतमभवत् यत्र कुम्भे मित्रस्य तेज आसीत् अतस्तेजोन्तरसंगमादुत्पन्नैकस्य तव सुत इत्युक्तमगस्त्येन मित्रं प्रति।

“अगस्त्यश्च वशिष्ठश्च मित्रावरुणयोर्ऋषी। रेतः सुषिचतोः कुम्भे उर्वश्याः सन्निधौ तथा” भाग० ६।१८।५। ३अप्सरोभेदेस्त्री “गोपाली सहजन्या च कुम्भयोनिः प्रजागरा” भा०व०४३अ०। ४द्रोणाचार्य्ये पु० तदुत्पत्तिकथा द्रोणशब्दे वक्ष्यते ५द्रोणपुष्पीवृक्षे पु०राजनि०

**कुम्भरेतस्** पु० अग्निभेदे। “हविषा यो द्वितीयेन सोमेन सह युज्यते। रथप्रभूरथाध्वा च कुम्भरेताः स उच्यते” भा० व० २१८अ० अग्निवंशवर्णने। कुम्भस्थितं रेतः कारणमस्य। २अगस्त्ये ३वशिष्ठे मुनौ तयोर्यथा तथात्वं तथा कुम्भयोनिशब्दे उक्तम्

**कुम्भला** स्त्री कुम्भं कुम्भाकारं लाति ला—क। (मुण्डिरी) मुण्डीरिकालतायाम् रत्नमा०

**कुम्भवि(ब)ल** न० ६त०। कुम्भस्थे गर्त्ते अन्तोदात्तोऽयम्

**कुम्भवीज** पु०कुम्भ इव वीजमस्य (रीठा) करञ्जभेदे राजनि०

**कुम्भशाला** स्त्री कुम्भपाकार्थं शाला। (पोयान)(कुमारशाला) कलसपाकार्थे गृहे हेमच०

**कुम्भसन्धि** पु० कुम्भयोर्हस्तिशीर्षस्थमांसपिण्डयोः सन्धिः। आरचाख्ये हस्तिकुम्भमध्यस्थाने त्रिका०

**कुम्भसम्भव** पु० संभवत्यस्मात् सम्+भू—अपादानेऽप् कुम्भः सम्भवोऽस्य। १अगस्त्ये २वशिष्ठे ३द्रोणाचार्य्ये च तत्रागस्त्यवशिष्ठयोस्ततउत्पत्तिकथा कुम्भयोनिशब्दे उक्ता

**कुम्भसर्पिस्** न० सुश्रुतोक्ते कलसे एकादशशतवर्षस्थिते घृतभेदे “पुराणं तिमिरश्वासपीनसज्वरकासनुत्। मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम्। एकादशशतञ्चैव वत्सरानुषितं घृतम्। रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम्”। [ शब्दमा०

**कुम्भा** स्त्री कुत्सित इत्या उम्भा पूर्त्तिरस्याः शक०। वेश्यायां

**कुम्भाण्ड** पु० कुम्भइवाण्डोऽस्य। वाणासुरस्य मन्त्रिभेदे “इत्येवमुक्तः प्रहसन् कुम्भाण्डमिदमब्रवीत्” हरिव० १७५अ० “एतस्मिन्नन्तरे तत्र कुम्भाण्डाय महात्मने कुम्भाण्ड! मन्त्रिणां श्रेष्ठ! प्रीतोऽस्मि तव सुव्रत!। एतद्दत्त्वाऽभयं तस्मै कुम्भाण्डाय महात्मने। विवाहमकरोत् तत्र सोऽनिरुद्धस्य वीर्यवान्” हरिव० १८८अ०। स्वार्थे क। तत्रैव। सच कुष्माण्डे न० गौरकुष्माण्ड्याम् स्त्री राजनि०

**कुम्भाधिप** पु० ६त०। शनिग्रहे तस्य तदधिपत्वात् कुम्भाधीशादयोऽप्यत्र पु०

**कुम्भिका** स्त्री कुम्भस्तदाकारोऽस्त्यस्याः ठन्। (पाना)जले